प्रवेश सं० १८१३८ विषय: पुराणेतिहासम् क्रम सं० ———

नाम एकादशीमाहात्म्यवर्णनम् (वाराह भविष्योत्तर कूर्मपुराणस्थम्) ग्रन्थकार ———

पत्र सं० १६-१७, २४-२५.

श्लोक सं० ——— अक्षर सं० (पंक्तौ) ५६ पंक्ति सं० (पृष्ठे) १२

आकार: १२.६" × ४.९" लिपि: दे.ना. आधार: क.

वि० विवरणम् अपू० 14465

पी० एस० यू० पी०—७७ एस० सी० ई०—१६५१—५० ००० न. ३७५३

Indira Gandhi National Centre for the Arts

कामदायाउपोषणं ॥ तस्पुण्यस्यप्रभावेनागतस्त्वस्यपिशाचता ॥ ३४ ॥ ललिताक्षमादेववर्त्तमानोपितत्क्षणात् ॥ गतपापस्सललितोदिव्यदेहोबभूव ह ॥ ३५ ॥
राक्षसत्वंगतंतस्य प्राप्तोगंधर्वतांपुनः ॥ हेमरत्नसमाकीर्णे रेमेललितयासह ॥ ३६ ॥ तौविमानसमारूढौ पूर्वरूपाधिकाशुभौ ॥ दंपतीत्र
त्पशोभेतांकामदायाः प्रसादतः ॥ इतिज्ञात्वा मुनिश्रेष्ठ कर्त्तव्यैषाप्रयत्नतः ॥ लोकानांचहितार्थायतवाग्रेकथितामया ॥ ३८ ॥ ब्रह्महत्यादि
पापघ्नीपिशाचत्वविनाशिनी ॥ नातःपरतराकाचित्त्रैलोक्येसचराचरे ॥ पठनाच्छ्रवणाद्राजन्वाजपेयफलंलभेत् ॥ इतिश्रीवाराह
पुराणेचैत्रशुक्लकामदानामैकादशीमाहात्म्यसमाप्तं ॥ युधिष्ठिरउवाच ॥ वैशाखस्यासितेपक्षे किंनामैकादशीभवेत् ॥ महिमानंक
थयमेवासुदेवनमोस्तुते ॥ श्रीकृष्णउवाच ॥ सौभाग्यदायिनीराजन्निहलोकेपरत्रच ॥ वैशाखकृष्णपक्षेतुनाम्नाचैववरूथिनी ॥ २ ॥ व
रूथिन्याव्रतेनैवसौख्यंभवतिसर्वदा ॥ पापहानिश्चभवतिसौभाग्यप्राप्तिरेवच ॥ ३ ॥ दुर्भगायाकरोत्येनांसास्त्रीसौभाग्यमाप्नुयात् ॥
लोकानांचैवसर्वेषांभुक्तिमुक्तिप्रदायिनी ॥ सर्वपापहरानॄणांगर्भवासनिकृन्तनी ॥ वरूथिन्याव्रतेनैवमांधातास्वर्गतिंगतः ॥ धुंधु
माराद्यश्चान्येराजानोबहवस्तथा ॥ ब्रह्मकपालनिर्मुक्तोबभूवभगवान्भवः ॥ दशवर्षसहस्राणितपस्तप्यतियोनरः ॥ तत्तुल्यफल
माप्नोतिवरूथिन्याव्रतादिह ॥ ७ ॥ सूर्यग्रहेकुरुक्षेत्रे स्वर्णभारंददातियः ॥ तत्तुल्यफलमाप्नोति वरूथिन्याव्रतादिह ॥ श्रद्धावान्यस्तु
कुरुतेवरूथिन्याव्रतंनरः ॥ वांछितंफलमाप्नोति इहलोकेपरत्रच ॥ पवित्रापापिनांह्येषामहापातकनाशिनी ॥ भुक्तिमुक्तिप्रदा
ह्येषाकर्त्तव्यानृपसत्तम ॥ १० ॥ अश्वदानान्नृपश्रेष्ठ गजदानंविशिष्यते ॥ गजदानाद्भूमिदानं तिलदानंततोधिकं ॥ ततःसुव
र्णदानंचअन्नदानंततोधिकं ॥ अन्नदानात्परंदानं नभूतंनभविष्यति ॥ पितृदेवमनुष्याणां तृप्तिरन्नेनजायते ॥ तत्समंकवि

Indira Gandhi National
Centre for the Arts

१५ भिः प्रोक्तं कन्यादानं तपोत्तमम्॥ धेनुदानं च तत्तुल्यमित्याह भगवान्स्वयं॥ गोकोट्यः सर्वदानेभ्यो विद्यादानं विशिष्यते॥ तत्फलं समवाप्नोति
नरः कृत्वा वरूथिनीं॥ कन्यावित्तेन जीवंति ये नराः पापमोहिताः॥ पुण्यक्षयात्ते गच्छंति निरयं यातनायुतं॥ तस्मात्सर्वप्रयत्नेन न
ग्राह्यं कन्यकाधनं॥ कन्यां पुरापेन योद्धा यथाशक्त्या अलंकृता॥ तत्पुण्यमसमं नापते चित्रगुप्तो न वेत्त्यलं॥ २१॥ कांस्यं मां
सं मसूरान्नं चणकान्कोद्रवांस्तथा॥ शाकं मधु परान्नं च पुनर्भोजनमैथुने॥ वैष्णवव्रतकर्ता च दशम्यां दश वर्जयेत्॥ द्यूत
क्रीडां च निद्रां च तांबूलं दंतधावनं॥ परापवादं पैशुन्यं स्तेयं हिंसां रतिं तथा॥ क्रोधं चानृतवाक्यं च एकादश्यां विवर्जयेत्॥
कांस्यं मांसं मसूरांश्च क्षौद्रं वितथभाषणं॥ व्यायामं च प्रवासं च पुनर्भोजनमैथुने॥ २२॥ स्पृष्टास्पृष्टं च तैलं च द्वादश्यां परि
वर्जयेत्॥ अनेन विधिना राजन्विहिता वै वरूथिनी॥ रात्रौ जागरणं कृत्वा पूजयेन्मधुसूदनं॥ सर्वपापविनिर्मुक्तो स
याति परमां गतिं॥ २३॥ तस्मात्सर्वप्रयत्नेन कर्तव्या पापभीरुभिः॥ क्षपारितनया॥ इतेर्नर्मदे वरूथिनी॥ पठनाच्छ्रवणाद्
राजन्गोसहस्रफलं लभेत्॥ सर्वपापविनिर्मुक्तो विष्णुलोके महीयते॥ इति भविष्योत्तरपुराणे वैशाखकृष्णवरूथिन्ये
कादशीव्रतमाहात्म्यं समाप्तं॥ युधिष्ठिर उवाच॥ वैशाखस्य सिते पक्षे तु किंनामैकादशी भवेत्॥ किं फलं को विधिस्तस्याः कथय
स्व जनार्दन॥ १॥ श्रीकृष्ण उवाच॥ कथयामि कथामेतां शृणु त्वं धर्मनंदन॥ वशिष्ठो यामकथयत्पुरा रामाय
पृच्छते॥ २॥ श्रीराम उवाच॥ ॥ भगवञ्छ्रोतुमिच्छामि व्रतानां व्रतमुत्तमं॥ सर्वपापक्षयकरं सर्वदुःखनि १५

भ२

कृंतनं॥ मया दुःखानि भुक्तानि सीताविरहजानि तु॥ ततोहं भयभीतोस्मि पृच्छामि त्वां महामुने॥ ॥वशिष्ठ उवाच॥ ॥सा
धु पृष्टं त्वया राम तवैषा नैष्ठिकी मतिः॥ त्वन्नामग्रहणेनैव पूतो भवति मानवः॥ तथापि कथयिष्यामि लोकानां हित
काम्यया॥ पवित्रं पावनानां च व्रतानामुत्तमं व्रतं॥ वैशाखस्य सिते पक्षे द्वादशी राम या भवेत्॥ मोहिनी नाम सा प्रो
क्ता सर्वपापहरा परा॥ मोहजालात्प्रमुच्यन्ते पातकानां समूहतः॥ अस्या व्रतप्रभावेण सत्यं सत्यं वदाम्यहं॥ ८॥
अतः कारणतो राम कर्तव्यैषा भवादृशैः॥ पातकानां क्षयकरी महादुःखविनाशिनी॥ शृणुष्वैकमना राम कथां पाप
हरां परां॥ यस्याः श्रवणमात्रेण महत्पापं प्रणश्यति॥ १०॥ सरस्वत्यास्तटे रम्ये पुरी भद्रावती शुभा॥ द्युतिमान्नाम न
पतिस्तत्र राज्यं करोति वै॥ ११॥ सोमवंशोद्भवो राम धृतिमान्सत्यसंगरः॥ तत्र वैश्यो निवसति धनधान्यसमृद्धिमान्॥ १२॥ धनपाल इति ख्यातो
पुण्यकर्मप्रवर्तकः॥ प्रपासत्राद्यायतनतडागारामकारकः॥ विष्णुभक्तिपरः शांतस्तस्यासन्पंच पुत्रकाः॥ सुमना द्युतिमांश्चैव मेधावी सु
कृती तथा॥ पंचमो धृष्टबुद्धिश्च महापापरतः सदा॥ वारस्त्रीसंगनिरतो विटगोष्ठीविशारदः॥ १५॥ द्यूतादिव्यसनासक्तः परस्त्रीरतिलालसः॥
न देवानातिथीन्वृद्धान्न पितॄंश्च द्विजानपि॥ अन्यायकर्ता दुष्टात्मा पितुर्द्रव्यक्षयंकरः॥ अभक्ष्यभक्षकः पापः सुरापानरतः सदा॥ १७॥
वेश्याकंठक्षिप्तभुजो भ्रमंस्तिष्ठंश्चतुष्पथे॥ पित्रा निष्कासितो गेहात्परित्यक्तः स्वबांधवैः॥ स्वदेहभूषणान्येव क्षयं नीतानि तेन वै॥
गणिकाभिः परित्यक्तो निंदितश्च धनक्षयात्॥ १९॥ ततश्चिंतापरो भूत्वा वस्त्रहीनः क्षुधान्वितः॥ किं करोमि क्व गच्छामि केनोपाये
न जीव्यते॥ तस्करत्वं समारब्धं तत्रैव नगरे पुनः॥ गृहीतो राजपुरुषैर्मुक्तश्चापि तु गौरवात्॥ २१॥ पुनर्बद्धः पुनर्मुक्तः पुनर्बद्धः स सं
ते

Indira Gandhi National Centre for the Arts

१७ मे॥ धृष्टबुद्धिर्दुराचारो निबध्य निगडे दृढैः॥२२॥ कशाघातैस्ताडितश्च पीडितश्च पुनः पुनः॥ एवमुक्तो ततो राज्ञा मोचितो दृढबंधनात्॥ तस्यात्त्वं
हि मंदात्मन् त्वया मद्देशगोचरे॥ निर्जगाम भयात्तस्य गतोसौ गहनं वनं॥२४॥ क्षुत्तृषापीडितश्चायमितश्चेतश्च धावति॥ सिंहवन्निजघा
नासौ मृगशूकरचित्रकान्॥ आमिषाहारनिरतो वने तिष्ठति सर्वदा॥ करे शरासनं कृत्वा निषंगं पृष्ठसंगतं॥ अरण्यचारिणो हंति
पक्षिणश्च चतुष्पदान्॥ चकोरांश्च मयूरांश्च कपोतांस्तित्तिरिमूषकान्॥ एतानन्यान्स तैर्नित्यं दुष्टधीर्निर्गतोऽघृणः॥ पूर्वजन्मकृतैः पापै
र्निमग्नः पापकर्दमे॥२८॥ दुःखशोकसमाविष्टश्चिंतयन्सोऽप्यहर्निशं॥ कौडिन्यस्याश्रमपदं आप्तः पुण्यवशात्क्वचित्॥ माधवे मा
सि जाह्नव्यां कृतस्नानं तपोधनं॥ आससाद धृष्टबुद्धिः शोकभारेणपीडितः॥३०॥ तद्वस्त्रबिंदुसंस्पर्शात्स पापात्मा हताशुभः॥ कौडिन्य
स्याग्रतो भूत्वा प्रत्युवाच कृतांजलिः॥३१॥ प्रायश्चित्तं ब्रूहि ब्रह्मन्विना वित्तेन यद्भवेत्॥ आजन्मकृतपापस्य नास्ति वित्तं ममाधुना॥ कौ
डिन्य उवाच॥ शृणुष्वैकमना भूत्वा येन पापक्षयस्तव॥ वैशाखस्य सितपक्षे मोहिनी नाम नामतः॥ एकादशीव्रतं तस्याः कुरु मद्वा
क्यनोदितः॥ मेरुतुल्यानि पापानि क्षपयेन्न पतिदेहिनां॥३४॥ बहुजन्मार्जितान्येषा मोहिनी समुपोषिता॥ वशिष्ठ उवाच॥ इति वा
क्यं मुनेः श्रुत्वा धृष्टबुद्धिः प्रसन्नहृत्॥ व्रतं चकार विधिवत्कौडिन्यस्योपदेशतः॥ कृते व्रते नृपश्रेष्ठ हतपापो बभूव सः॥ दिव्यदे
हस्ततो भूत्वा गरुडोपरि संस्थितः॥ जगाम वैष्णवं लोकं सर्वोपद्रववर्जितं॥ इतीदृशं रामचंद्र उत्तमं मोहिनीव्रतं॥ नतःपरतरं कि
चित्त्रैलोक्ये सचराचरे॥ यज्ञादितीर्थदानानि कलां नार्हंति षोडशीं॥ पठनाच्छ्रवणाद्राजन्गोसहस्रफलं लभेत्॥३५॥ इति
श्रीकूर्मपुराणे वैशाखशुक्लमोहिनीनामैकादशीव्रतमाहात्म्यं समाप्तं॥ युधिष्ठिर उवाच॥ ज्येष्ठस्य कृष्णपक्षे तु किंनामैकाद २०

तुलसीमंजरीभिस्तु पूजितो येन केशवः॥ आजन्मकृतपापस्य तेन संमार्जिता लिपिः॥ या दृष्टा निखिलाघसंघशमनी स्पृष्टा व
पुःपावनी रोगाणामभिवंदिता निरसनी सिक्तांतकत्रासिनी॥ प्रत्यासत्तिविधायिनी भगवतः कृष्णस्य संरोपिता न्यस्ता तच्चरणे
विमुक्तिफलदा तस्यै तुलस्यै नमः॥२४॥ दानं दत्तं तिथौ मत्स्यां दिवारात्रौ हरेर्दिने॥ तस्य पुण्यस्य संख्यानं चित्रगुप्तो न वेत्त्य
१८ लं॥२५॥ आग्रे दीपको यस्य ज्वलत्येकादशीदिने॥ पितरस्तस्य तृप्यंति अमृतेन दिवि स्थिताः॥२६॥ घृतेन दीपं प्रज्वा
ल्य तिलतैलेन वा पुनः॥ प्रयाति सूर्यलोकं स दीपकोटिशतैर्वृतः॥२७॥ एषा तवाग्रे कथिता कामिकामहिमा मया॥ अतो
नरैः प्रकर्तव्या सर्वपातकहारिणी॥२८॥ ब्रह्महत्यापहारिणी भ्रूणहत्याविनाशिनी॥ त्रिदिवस्थानदात्री च महापु
ण्यफलप्रदा॥२९॥ श्रुत्वा माहात्म्यमेतस्या नरः श्रद्धासमन्वितः॥ विष्णुलोकमवाप्नोति सर्वपापैः प्रमुच्यते॥३०॥ ॥इति श्री
ब्रह्मवैवर्ते श्रावणकृष्णपक्षे कामिकामाहात्म्यं समाप्तं॥ ॥युधिष्ठिर उवाच॥ ॥ श्रावणस्यासिते पक्षे किंनामैकादशी भ
वेत्॥ कथयस्व प्रसादेन ममाग्रे मधुसूदन॥ श्रीकृष्ण उवाच॥ शृणुष्वावहितो राजन्कथां पापहरां परां॥ यस्याः श्रवणमात्रेण वाजपेयफलं
लभेत्॥२॥ द्वापरस्य युगस्यादौ पुरा माहिष्मतीपुरे॥ राजा महीजिदाख्यातो राज्यं पालयति स्वयं॥३॥ पुत्रहीनस्य तस्यैव न तद्राज्यं सु
खप्रदं॥ अपुत्रस्य सुखं नास्ति इहलोके परत्र च॥४॥ ततोऽस्य न सुखप्राप्तिः कालो बहुतरो गतः॥ न प्राप्तश्च सुतो राज्ञा सर्वसौख्यप्रदो
नृणां॥५॥ दृष्ट्वात्मानं प्रवयसं राजा चिंतापरोऽभवत्॥ सदोगतः प्रजामध्ये इदं वचनमब्रवीत्॥६॥ इहजन्मनि नो लोका मया पातकं कृ
तं॥ अन्यायोपार्जितं वित्तं क्षिप्तं कोशे मया न हि॥७॥ ब्रह्मस्वं देवताद्रव्यं न गृहीतं मया क्वचित्॥ न्यासापहरणं न कृतं परस्य बहुपाप

Indira Gandhi National
Centre for the Arts

व ता

१२४ दः॥ सुतवत्पालिता लोका [illegible] धर्मेण विजिता मही॥ दुष्टेषु पातितो दंडो बंधुपुत्रोपमेष्वपि॥९॥ शिष्टाः संपूजिता लोके सेव्या
ग्रापि मया जनाः॥ इत्येवं तेन मार्गेण धर्मयुक्ते द्विजोत्तमाः॥१०॥ कस्मान्मम गृहे पुत्रो न जातस्तद्विमृश्यतां॥ इति वाक्यं द्विजाः श्रुत्वा सप्र
जाः सपुरोहिताः॥११॥ मंत्रयित्वा नृपहितं जग्मुस्ते गहनं वनं॥ इतश्चेतश्च पश्यंत आश्रमान् ऋषिसेवितान्॥१२॥ नृपतेर्हितमिच्छंतो
ददृशुर्मुनिसत्तमं॥ तप्यमानं तपो घोरं चिदानंदं निरामयं॥१३॥ निराहारं जितात्मानं जितक्रोधं सनातनं॥ लोमशं धर्मतत्त्वज्ञं स
र्वशास्त्रविशारदं॥१४॥ दीर्घायुषं महात्मानमनेकब्रह्मसंमितं॥ कल्पे कल्पे गते तस्य लोम एकं विशीर्यते॥१५॥ अतो लोमशनामा
नं त्रिकालज्ञं महामुनिं॥ तं दृष्ट्वा हर्षितास्सर्वे आजग्मुस्तस्य संनिधौ॥१६॥ यथान्यायं यथार्हं तेन नमश्चक्रुर्यथोदितं॥ अस्मद्भाग्य
वशादेव प्राप्तोयं मुनिसत्तमः॥ विनयावनताः सर्वे ऊचुस्ते च परस्परं॥ तांस्तथावनतान्दृष्ट्वा उवाच मुनिसत्तमः॥१८॥ किम
र्थमिह संप्राप्ताः कथयध्वं च कारणं॥ मद्दर्शनाद्धृद्गिरस्तु वदध्वं मां किमु॥१९॥ असंशयं करिष्यामि भवतां यद्धितं भवेत्॥
परोपकृतये जन्म मादृशानां न संशयः॥२०॥ जना ऊचुः॥ श्रूयतामभिधास्यामो वयमागमनकारणं॥ संशयच्छेदनार्थाय तव
संनिधिमागताः॥२१॥ पद्मयोनेः परतरस्त्वत्तः श्रेष्ठो न विद्यते॥ अतः कार्यवशादस्मादागताः समीपमव तो वयं॥ महीजिन्नाम रा
जासौ पुत्रहीनोस्ति सांप्रतं॥ वयं तस्य प्रजा ब्रह्मन्पुत्रवत्तेन पालिताः॥२३॥ तं पुत्ररहितं दृष्ट्वा तस्य दुःखेन दुःखिताः॥ तपः
कर्तुमिहायाता मतिं कृत्वा तु नैष्ठिकीं॥२४॥ तस्य भाग्यवशाद्दृष्टो भवानस्माकं द्विजोत्तम॥ महतां दर्शनेनैव कार्यसिद्धिर्भवेन्नृणां॥२५॥
भि २ २४

उपदेशं वद मुने राज्ञः पुत्रो यथा भवेत्॥ श्रीकृष्ण उवाच॥ इति तेषां वचः श्रुत्वा मुहूर्तं ध्यानमास्थितः॥२६॥ प्रत्युवाच मुनिर्ज्ञात्वा तस्य जन्म
पुरातनं॥ पूर्वजन्मनि वैश्योयं धनहीनो नृशंसकृत्॥२७॥ वाणिज्यकर्मनिरतो ग्रामाद्ग्रामांतरं व्रजन्॥ ज्येष्ठमासि सिते पक्षे दशमी
दिवसे तथा॥२८॥ मध्याह्ने द्युमणौ प्राप्ते ग्रामसीम्नि जलाश्रयं॥ कूपिकां निर्मलां दृष्ट्वा जलपाने मनो दधौ॥२९॥ सद्यः सूता सव
त्सा च धेनुस्तत्र समागता॥ तृषाकुला निदाघार्ता तस्यामापः पपौ तु सा॥ पिबंतीं वारयित्वा तामेसौ तोयं पुनः पपौ॥३०॥ कर्मणा तस्य पाके
न पुत्रहीनो नृपोभवत्॥ कस्यापि जन्मनः पुण्यात्प्राप्तराज्यमकंटकं॥३१॥ लोका ऊचुः॥ पुण्यात्पापक्षयं यांति पुराणे श्रूयते मुने॥
पुण्योपदेशं कथय येन पापक्षयो भवेत्॥३२॥ यथा भवत्प्रसादेन पुत्रो भवति भूपते॥ लोमश उवाच॥ श्रावणस्य सिते पक्षे तु पुत्रदा
नाम विख्याता॥ एकादशी वांछितदा कुरुध्वं भो व्रतं जनाः॥ यथाविधि यथान्यायं यथोक्तं जागरान्वितं॥ तस्य पुण्यं च विमलं दद्ध्वं नृप
तये जनाः॥ एवं कृते सुनियतं राज्ञः पुत्रो भविष्यति॥ श्रुत्वा ते लोमशवचः संप्रणम्य द्विजोत्तमं॥ प्रत्याजग्मुर्गृहान्सर्वे ययुः फुल्लवि
लोचनाः॥ श्रावणं तु समासाद्य स्मृत्वा लोमशभाषितं॥ जनाः सर्वे व्रतं चक्रुः सर्वे श्रद्धासमन्विताः॥ द्वादशी दिवसे पुण्यं ददुर्नृ
पतये जनाः॥ एवमेव नृपश्रेष्ठ पुत्रदा नाम विख्याता॥ कर्तव्या सुखमिच्छद्भिरिह लोके परत्र च॥ श्रुत्वा माहात्म्यमेतस्य नरः पा
पैः प्रमुच्यते॥ इह पुत्रसुखं प्राप्य परत्र स्वर्गे प्रमोदते॥ इति श्रीभविष्योत्तरपुराणे श्रावणशुक्ले पुत्रदा एकादशी माहात्म्यं स
माप्तं॥ युधिष्ठिर उवाच॥ भाद्रस्य कृष्णपक्षे तु किंनामैकादशी भवेत्॥ एतदिच्छाम्यहं श्रोतुं कथयस्व प्रसादाज्जनार्दन॥१॥ श्रीकृ
ष्ण उवाच॥ शृणुष्वैकमना राजन् कथयिष्यामि विस्तरात्॥ अजेति नामतः प्रोक्ता सर्वपापप्रणाशिनी॥२॥ पूजयित्वा हृषीकेशं व्रत

Indira Gandhi National
Centre for the Arts

१५ मस्याः करोति यः पापानि तस्य नश्यंति महापातकान्यपि ॥३॥ नातः परतरा राजन् लोकद्वयहिता व्रता ॥४॥ सत्यमुक्तं त्वया घोरं तन्नाम स्यंम
प्रभाषितं ॥ हरिश्चंद्र इति ख्यातो बभूव नृपतिः पुरा ॥५॥ चक्रवर्ती सत्यसंधः समस्तायाः भुवः पतिः ॥ कस्यापि कर्मणो भोगात् [illegible]
षो बभूव सः ॥६॥ विक्रीता वनिता पुत्रो स्वकश्चकारात्मविक्रयं ॥ पुष्कसस्य च दासत्वं गते मा जातस्य पुरापकृत ॥७॥ सत्यमालं
ब्य राजेंद्र मृतचेलापहारकः ॥ सो भवन्नृपतिश्रेष्ठो न सत्याच्चलितस्तथा ॥८॥ एवं गतस्य नृपतेर्बहवो वत्सरा गताः ॥ तत
श्चिंतापरो राजन् स बभूवाति दुःखितः ॥९॥ किं करोमि क्व गच्छामि निष्कृतिर्मे कथं भवेत् ॥ इति चिंतापरस्तस्य मग्नस्य वृजिना
र्णवे ॥१०॥ आजगाम मुनिः कश्चित् ज्ञात्वा राजानमातुरं ॥ परोपकरणार्थाय निर्मिता ब्रह्मणा द्विजाः ॥ स तं दृष्ट्वा द्विजवरं
ननाम नृपसत्तमः ॥११॥ कृतांजलिपुटो भूत्वा गौतमस्याग्रतः स्थितः ॥ कथयामास स्वं वृत्तं [illegible] दुःखसंयुतं ॥१२॥ श्रुत्वा नृ
पतिवाक्यानि गौतमो विस्मयान्वितः ॥ उपदेशं नृपतये व्रतस्यास्य ददौ मुनिः ॥१३॥ मासि भाद्रपदे राजन् कृष्णपक्षे तु शोभ
ना ॥ एकादशी समाख्याता अजा नाम्नातिपुण्यदा ॥१४॥ कुरु तस्या व्रतं राजन् पापस्यांतो भविष्यति ॥ तव भाग्यवशादेषा स
प्तमे ह्नि समागता ॥१५॥ उपवासपरो भूत्वा रात्रौ जागरणं कुरु ॥ एवमस्या व्रते चीर्णे पापराशिः क्षयो ध्रुवं ॥१६॥ श्रूयतां
राजशार्दूल प्रभावोस्य व्रतस्य सः ॥ पद्भुः स्वं तु मिवर्षे भोग्यं तत्क्षणे भवेत् ॥१७॥ तव पुण्यप्रभावेन चागतोहं नृपो
त्तम ॥ इत्येवं कथयित्वा तु मुनिरंतरधीयत ॥१८॥ मुनिवाक्यं नृपः श्रुत्वा चकार व्रतमुत्तमं ॥ कृते तस्मिन् व्रते राज्ञः पापस्यांतो
भवत्क्षणात् ॥१९॥ निस्तीर्णदुःखो राजासीद्व्रतस्यास्य प्रभावतः ॥ पत्न्या सह समायोगं पुत्रजीवनमाप्स ॥२०॥ देवदुंदुभयो २५

Indira Gandhi National Centre for the Arts